श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७९

*रुक्मिणीस्वयंवरवर्णनम्*

बलसमेतबलानुगतो भवान्
    पुरमगाहत भीष्मकमानितः।
द्विजसुतं त्वदुपागमवादिनं
    धृतरसा तरसा प्रणनाम सा॥ १॥

भुवनकान्तमवेक्ष्य भवद्वपु-
    र्नृपसुतस्य निशम्य च चेष्टितम्।
विपुलखेदजुषां पुरवासिनां
    सरुदितैरुदितैरगमन्निशा॥ २॥

तदनु वन्दितुमिन्दुमुखी शिवां
    विहितमङ्गलभूषणभासुरा।
निरगमद्भवदर्पितजीविता
    स्वपुरतः पुरतः सुभटावृता॥ ३॥

कुलवधूभिरुपेत्य कुमारिका
    गिरिसुतां परिपूज्य च सादरम्।
मुहुरयाचत तत्पदपङ्कजे
    निपतिता पतितां तव केवलम्॥ ४॥

समवलोककुतूहलसङ्कुले
    नृपकुले निभृतं त्वयि च स्थिते।
नृपसुता निरगाद् गिरिजालयात्
    सुरुचिरं रुचिरञ्जितदिङ्मुखा॥ ५॥

www.prapatti.com

भुवनमोहनरूपरुचा तदा
विवशिताखिलराजकदम्बया।
त्वमपि देव कटाक्षविमोक्षणैः
प्रमदया मदयाञ्चकृषे मनाक्॥ ६ ॥

क्वनु गमिष्यसि चन्द्रमुखीति तां
सरसमेत्य करेण हरन् क्षणात्।
समधिरोप्य रथं त्वमपाहृथा
भुवि ततो विततो निनदो द्विषाम्॥ ७ ॥

क्वनु गतः पशुपाल इति क्रुधा
कृतरणा यदुभिश्च जिता नृपाः।
न तु भवानुदचाल्यत तैरहो
पिशुनकैः शुनकैरिव केसरी॥ ८ ॥

तदनु रुक्मिणमागतमाहवे
वधुमुपेक्ष्य निबध्य विरूपयन्।
हृतमदं परिमुच्य बलोक्तिभिः
पुरमया रमया सह कान्तया॥ ९ ॥

नवसमागमलज्जितमानसां
प्रणयकौतुकजृम्भितमन्मथाम्।
अरमयः खलु नाथ यथासुखं
रहसि तां हसितांशुलसन्मुखीम्॥ १० ॥

विविधनर्मभिरेवमहर्निशं
प्रमदमाकलयन् पुनरेकदा।
ऋजुमतेः किल वक्रगिरा भवान्
वरतनोरतनोदतिलोलताम्॥ ११ ॥

तदधिकैरथ लालन कौशलैः
प्रणयिनीमधिकं सुखयन्निमाम्।



www.prapatti.com

अयि मुकुन्द भवच्चरितानि नः
प्रगदतां गदतान्तिमपाकुरु॥ १२॥

**********

www.prapatti.com